

# ॥ श्रीभवानी सहस्रनाम स्तोत्रं – श्रीरुद्र यामलम् ॥
# Sri Bhavani Sahasranama Stotram – Sri Rudra Yamalam

The following is a rare **Saharanamam** (**1008 names**) of **Goddess Bhavani** from **Sri Rudra Yamala Tantram** as told by **Lord Shiva** to **Lord Nandi**. The **Phalashruti** is very elaborate running to several pages. In summary the following benefits are said to accure to the one who chants this Sahasranama with devotion:

- Relief from all sins, sorrows, diseases, inauspiciousness, planetary afflictions, afflictions from evil spirits, etc.
- Accrual of wealth, grains, lustre, comforts, fame, auspicious events, progeny, clan, spouse, etc.
- Chanting this Sahasranama 10 times a day bestows divine vision of **Sri Bhavani** in dreams. Chanting this 1000 times bestows **Siddhi** of this Sahasranama.

श्रीगणेशाय नमः ।

शङ्ख त्रिशूल शर-चाप-करां त्रिनेत्रां तिग्मेतरांशु-कलया विलसत् किरीटाम् ।
सिंह-स्थितां असुर-सिद्ध-नुतां च दुर्गां दुर्गानिभां दुरित-दुःख-हरां नमामि ॥ १ ॥

अकुल-कुल-भदन्ती चक्र-मध्ये-स्फुरन्ती मधुर-मधु-पिबन्ती कण्टकान्-भक्षयन्ती ।
दुरितं-अपरहन्ती साधकान्-पोषयन्ती जयति जगति देवी सुन्दरी क्रीडयन्ति ॥ २ ॥

चतुर्भुजां एकवक्त्रां पूर्णेन्दु-वदन-प्रभाम् ।
खड्ग-शक्ति-धरां देवीं वरदाऽभय-पाणिकाम् ॥ ३ ॥

प्रेत-संस्थां महारौद्रीं भुजगेनोपवीतिनीम् ।
भवानीं काल-संहार बद्ध-मुद्रा-विभूषिताम् ॥ ४ ॥

जगत्-स्थिति-करीं ब्रह्म विष्णु-रुद्रादिभिः सुरैः ।
स्तुतां तां परमेशानीं नौम्यहं विघ्न-हारिणीम् ॥ ५ ॥

ॐ नमो भवान्यै ॥

कैलास शिखरे रम्ये देवदेवं महेश्वरम् ।
ध्यानोपरतं आसीनं प्रसन्न-मुख-पङ्कजम् ॥ १ ॥

सुराऽसुर शिरो-रत्न रञ्जिताङ्घ्रि युगं प्रभुम् ।
प्रणम्य शिरसा नन्दी बद्धाञ्जलिर् अभाषत ॥ २ ॥

श्रीनन्दिकेश्वर उवाच –

देवदेव जगन्नाथ संशयोऽस्ति महान् मम ।
रहस्यं किञ्चिद् इच्छामि प्रष्टुं त्वां भक्त-वत्सल ॥ ३ ॥

देवतायास् त्वया कस्याः स्तोत्रं एतद् दिवानिशम् ।
पठ्यते निरतं नाथ त्वत्तः किमपरः महत् ॥ ४ ॥

इति पृष्टस् तदा शम्भुर् नन्दिकेन जगद्गुरुः ।
प्रोवाच भगवान् ईशो विकसन्-नेत्र-पङ्कजः ॥ ५ ॥

श्रीभगवानुवाच –

साधु साधु गुण-श्रेष्ठ पृष्टवानसि मां च यत् ।
स्कन्दस्यापि च यद् गोप्यं रहस्यं कथयामि तत् ॥ ६ ॥

पुरा कल्पक्षये लोकान् सिसृक्षुर् मूढ-चेतनः ।
गुण-त्रय-मयी-शक्तिः मूलप्रकृति संज्ञिता ॥ ७ ॥

तस्यामहं समुत्पन्नः तत्वैस्तैर् महदादिभिः ।
चेतनेति ततः शक्तिर् मां काप्यालिङ्ग्य तस्थुषी ॥ ८ ॥

हेतुः सङ्कल्प जालस्य मनोऽधिष्ठायिनी शुभा ।
इच्छेति परमा शक्तिर् उन्मिमील ततः परम् ॥ ९ ॥

ततो वागिति विख्याता शक्तिः शब्दमयी पुरा ।
प्रादुरासीज् जगन्माता वेदमाता सरस्वती ॥ १० ॥

ब्राह्मी च वैष्णवी रौद्री कौमारी पार्वती शिवा ।
सिद्धिदा बुद्धिदा शान्ता सर्व-मङ्गल-दायिनी ॥ ११ ॥

तयैतत् सृज्यते विश्वं अनाधारं च धार्यते ।
तयैतत् पाल्यते सर्वं तस्यामेव प्रलीयते ॥ १२ ॥

अर्चिता प्रणता ध्याता सर्व-भाव-विनिश्चितैः ।
आराधिता स्तुता सैव सर्व-सिद्धि-प्रदायिनी ॥ १३ ॥

तस्याश्चा ऽनुग्रहादेव तामेव स्तुतवानहम् ।
सहस्रैर् नामभिर् दिव्यैः त्रैलोक्य-प्रणि-पूजितैः ॥ १४ ॥

स्तवेनानेन सन्तुष्टा मामेव प्रविवेश सा ।
तदारभ्य मया प्राप्तं ऐश्वर्यं पदमुत्तमम् ॥ १५ ॥

तत्प्रभावान् मया सृष्टं जगदेतच्-चराचरम् ।
ससुराऽसुर गन्धर्व यक्ष राक्षस मानवम् ॥ १६ ॥

सपन्नगं ससामुद्रं सशैल वन काननम् ।
सग्रहं राशि नक्षत्र पञ्च-भूत-गुणान्वितम् ॥ १७ ॥

नन्दिन् नाम-सहस्रेण स्तवेनानेन सर्वदा ।
स्तौम्यहं परमां शक्तिं ममाऽनुग्रह-कारिणीम् ॥ १८ ॥

इत्युक्तोपरतं देवं चराचर गुरुं विभुम् ।
प्रणम्य शिरसा नन्दी प्रोवाच परमेश्वरम् ॥ १९ ॥

श्रीनन्दिकेश्वर उवाच –

भगवन् देवदेवेश लोकनाथ जगत्प्रभो ।
भक्तोऽस्मि तव-दासोऽस्मि प्रसादः क्रियतां मयि ॥ २० ॥

देव्याः स्तवं इदं पुण्यं दुर्लभं यत् सुरैरपि ।
श्रोतुं इच्छाम्यहं देव प्रभावं अपि चाऽस्य तु ॥ २१ ॥

श्रीभगवानुवाच –

श्रृणु नन्दिन् महाभाग स्तवराजं इदं शुभम् ।
सहस्रैर् नामभिर् दिव्यैः सिद्धिदं सुख-मोक्षदम् ॥ २२ ॥

शुचिभिः प्रातरुत्थाय पठितव्यं समाहितैः ।
त्रिकालं श्रद्धया युक्तैर् नातः परतरः स्तवः ॥ २३ ॥

अस्य श्रीस्तवराजस्य सदाशिव ऋषिस् स्मृतः ।
देवता जगतां धात्री त्रिकूटा परमोत्तमा ॥ २४ ॥

शक्तिश् चण्डी कीलकं च कामराजाऽमिधं भवेत् ।
छन्दो ऽनुष्टुप् समाख्यातं मनसो वाञ्छितं फलम् ॥ २५ ॥

अथ ध्यानं वदाम्यस्य देव्याः परमं उत्तमम् ।
कृतेन येन जायान्ते नृणां सर्वे मनोरथा ॥ २६ ॥

नाभेर् अधस्तान् नीलाभां उपरि श्यामालाकृतिम् ।
अग्रे रक्ताऽरविन्दाभां चतुर्भुज समन्विताम् ॥ २७ ॥

ग्रैवेयाङ्गद संयुक्तां लसत् काञ्ची कपालिनीम् ।
एवं ध्यात्वा पठेत् पश्चात् स्तवराजं फलाप्तये ॥ २८ ॥

ततो न्यासं प्रकुर्वीत साधकः प्रेम सम्युतः ।
भेरुण्डाग्रे-मे-सदा-पातु चण्डी-मे पातु-पृष्ठतः ॥ २९ ॥

पाञ्चाली-दक्षिणे-पार्श्वे महाविद्या-च-वामके ।
ऊर्ध्वं-पातु-जगन्माता पात्वधः-शाङ्करी-मम ॥ ३० ॥

प्राच्यां-रक्षतु-चामुण्डा वह्नि-कोणे-च-गारुडी ।
कामाख्या-दक्षिण-देशे भूतात्मा-निरृतिर्-मम ॥ ३१ ॥

महालक्ष्मीर्-जला-देशे वायौ-पातु-शिवप्रिया ।
कौबेरे-कुलविद्या-च पात्वीशे-वारुणी तथा ॥ ३२ ॥

ऊर्ध्वं तुण्डकरा ऽधस्तात् पातु-त्रिपुर-भैरवी ।
एवं न्यासं समाधाय पठेद् विघ्न-विवर्जितः ॥ ३३ ॥

## ॥ विनियोगः ॥

ॐ अस्य श्रीभवानी नाम-सहस्र-स्तवराजस्य । श्रीभगवान् महादेव ऋषिः । अनुष्टुप् छन्दः । आद्या शक्तिः श्रीभगवती भवानी देवता । ह्रीं बीजं । श्रीं शक्तिः । क्लीं कीलकं । श्रीभगवती भवानी प्रीत्यर्थे जपे विनियोगः ॥

## ॥ ऋष्यादि न्यासः ॥

शिरसि महादेव ऋषये नमः । आस्ये अनुष्टुप् छन्दसे नमः । हृदि श्रीभगवती भवानी देवतायै नमः । गुह्ये ह्रीं बीजाय नमः । पादयोः श्रीं शक्तये नमः । सर्वाङ्गे क्लीं कीलकाय नमः ।

## ॥ मन्त्र-न्यासः ॥

ॐ श्रां ह्रां क्लां अङ्गुष्ठाभ्यां नमः । ॐ श्रीं ह्रीं क्लीं तर्जनीभ्यां नमः । ॐ श्रूं ह्रूं क्लूं मध्यमाभ्यां नमः । ॐ श्रैं ह्रैं क्लैं अनामिकाभ्यां नमः । ॐ श्रौं ह्रौं क्लौं कनिष्ठिकाभ्यां नमः । ॐ श्रः ह्रः क्लः कर-तल-कर-पृष्ठाभ्यां नमः ॥

## ॥ हृदयादि न्यासः ॥

ॐ श्रां ह्रां क्लां हृदयाय नमः । ॐ श्रीं ह्रीं क्लीं शिरसे स्वाहा । ॐ श्रूं ह्रूं क्लूं शिखायै वषट् । ॐ श्रैं ह्रैं क्लैं कवचाय हुम् । ॐ श्रौं ह्रौं क्लौं नेत्र-त्रयाय वौषट् । ॐ श्रः ह्रः क्लः अस्त्राय फट् ॥

## ॥ स्तव न्यासः ॥

ॐ एकवीरायै नमः – अङ्गुष्ठाभ्यां नमः । ॐ महामायायै नमः – तर्जनीभ्यां नमः । ॐ पार्वत्यै नमः – मध्यमाभ्यां नमः । ॐ गिरिश-प्रियायै नमः – अनामिकाभ्यां नमः । ॐ गौर्यै नमः – कनिष्ठिकाभ्यां नमः । ॐ करालिन्यै नमः – कर-तल-कर-पृष्ठाभ्यां नमः ॥

ॐ एकवीरायै नमः – हृदयाय नमः । ॐ महामायायै नमः – शिरसे स्वाहा । ॐ पार्वत्यै नमः – शिखायै वषट् । ॐ गिरिश-प्रियायै नमः – कवचाय हुम् । ॐ गौर्यै नमः – नेत्र-त्रयाय वौषट् । ॐ करालिन्यै नमः – अस्त्राय फट् । ॐ भूर्भुवस्सुवरों – इति दिग्बन्धः ॥

## ॥ मन्त्रः ॥

ॐ श्रीं ह्रीं क्लीं चण्डी योगेश्वरी भव-भवानी सर्व-काम-प्रदे सर्व-सौभाग्य-प्रदायिनी ह्रीं नमः ॥

## ॥ भवानी गायत्री मन्त्रः ॥

ॐ तत्पुरुषायै विद्महे । महादेव्यै धीमहि । तन्नो भवानी प्रचोदयात् ॥

## ॥ ध्यानम् ॥

ॐ ह्रीं श्रीं क्लीं सोऽहम् ॥

अर्धेन्दुमौलिं अमलां अमराऽभिवन्द्यां अम्भोज पाश सृणि पूर्ण कपाल-हस्ताम् ।
रक्ताङ्ग राग रसनाभरणां त्रिनेत्रां ध्यायेच् छिवस्य-वनितां मदविह्वलाङ्गीम् ॥ १ ॥

ॐ बालार्क-मण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुश शरञ् चापं धारयन्तीं शिवां भजे ॥ २ ॥

## ॥ पञ्च-पूजा ॥

लं पृथिव्यात्मिकायै गन्धं समर्पयामि । हं आकाशात्मिकायै पुष्पैः पूजयामि । यं वाय्वात्मिकायै धूपं आघ्रापयामि । रं वह्न्यात्मिकायै दीपं दर्शयामि । वं अमृतात्मिकायै अमृतं-महा-नैवेद्यं निवेदयामि । सं सर्वात्मिकायै सर्वोपचार-पूजां समर्पयामि ॥

## ॥ श्रीभवानी सहस्रनाम स्तोत्रम् ॥

ॐ महाविद्या जगन्माता महालक्ष्मीः शिवप्रिया ।
विष्णुमाया शुभा शान्ता सिद्धा सिद्ध-सरस्वती ॥ १ ॥

क्षमा कान्तिः प्रभा ज्योत्स्ना पार्वती विश्वमङ्गला ।
हिङ्गुला चण्डिका दान्ता पद्मा लक्ष्मीर् हरिप्रिया ॥ २ ॥

त्रिपुरा नन्दिनी नन्दा सुनन्दा सुर-वन्दिता ।
यज्ञविद्या महामाया वेदमाता सुधा धृतिः ॥ ३ ॥

प्रीतिः प्रिया प्रसिद्धा च मृडानी विन्ध्य-वासिनी ।
सिद्ध-विद्या महाशक्तिः पृथिवी नारद-सेविता ॥ ४ ॥

पुरुहूत-प्रिया कान्ता कामिनी पद्म-लोचना ।
प्रह्लादिनी महामाता दुर्गा दुर्गार्ति-नाशिनी ॥ ५ ॥

ज्वालामुखी सुगोत्रा च ज्योतिः कुमुद-वासिनी ।
दुर्गमा दुर्लभा विद्या स्वर्गतिः पुरवासिनी ॥ ६ ॥

अपर्णा शाम्बरी माया मदिरा मृदु-हासिनी ।
कुल-वागीश्वरी नित्या नित्यक्लिन्ना कृशोदरी ॥ ७ ॥

कामेश्वरी च नीला च भीरुण्डा वह्नि-वासिनी ।
लम्बोदरी महाकाली विद्या विद्येश्वरी तथा ॥ ८ ॥

नरेश्वरी च सत्या च सर्व-सौभाग्य-दायिनी ।
सङ्कर्षिणी नारसिंही वैष्णवी च महोदरी ॥ ९ ॥

कात्यायनी च चम्पा च सर्व-सम्पत्ति-कारिणी ।
नारायणी महानिद्रा योगनिद्रा प्रभावती ॥ १० ॥

प्रज्ञा पारमिता प्राज्ञा तारा मधुमती मधुः ।
क्षीरार्णव-सुता हारा कालिका सिंह-गामिनी ॥ ११ ॥

ओंकारा च सुधाकारा चेतना कोपना क्षितिः ।
अर्ध-बिन्दु-धरा धीरा विश्वमाता कलावती ॥ १२ ॥

पद्मावती सुवस्त्रा च प्रबुद्धा च सरस्वती ।
कुण्डासना जगद्धात्री बुद्धमाता जनेश्वरी ॥ १३ ॥

जिनमाता जितेन्द्रा च शारदा हंस-वाहिनी ।
राज्यलक्ष्मीर् वषट्कारा सुधाकारा सुधात्मिका ॥ १४ ॥

राजनीतिस् त्रयी-वार्ता दण्ड-नीतिः कृपावती ।
सद्भूतिस् तारिणी श्रद्धा सद्गतिः सत्परायणा ॥ १५ ॥

सिन्धुर् मन्दाकिनी गङ्गा यमुना च सरस्वती ।
गोदावरी विपाशा च कावेरी च शतहृदा ॥ १६ ॥

सरयूश् चन्द्रभागा च कौशिकी गण्डकी शिवा ।
नर्मदा कर्मनाशा च चर्मण्वती च वेदिका ॥ १७ ॥

वेत्रवती वितस्ता च वरदा वर-वाहिनी ।
सती पतिव्रता साध्वी सुचक्षुः कुण्ड-वासिनी ॥ १८ ॥

एकचक्षुः सहस्त्राक्षी सुश्रोणी भगमालिनी ।
सेनाश्रेणिः पताका च सुव्यूहा युद्ध-काङ्क्षणी ॥ १९ ॥

सुपताका जया रम्भा विपञ्ची पञ्चमप्रिया ।
परा परकला कान्ता त्रिशक्तिर् मोक्ष-दायिनी ॥ २० ॥

ऐन्द्री माहेश्वरी ब्राह्मी कौमारी कमलासना ।
इच्छा भगवती धेनुः कामधेनुः कृपावती ॥ २१ ॥

वज्रायुधा वज्रहस्ता चण्डी चण्ड-पराक्रमा ।
गौरी सुवर्ण-वर्णा च स्थिति-संहार-कारिणी ॥ २२ ॥

एका ऽनेका महेज्या च शतबाहुर् महाभुजा ।
भुजङ्ग-भूषणा भूषा षट्-चक्र-क्रम-वासिनी ॥ २३ ॥

षट्-चक्र-भेदिनी श्यामा कायस्था काय-वर्जिता ।
सुस्मिता सुमुखी क्षामा मूलप्रकृतिर् ईश्वरी ॥ २४ ॥

अजा च बहुवर्णा च पुरुषार्थ-प्रर्वर्तिनी ।
रक्ता नीला सिता श्यामा कृष्णा पीता च कर्बुरा ॥ २५ ॥

क्षुधा तृष्णा जरा वृद्धा तरुणी करुणालया ।
कला काष्ठा मुहूर्ता च निमेषा कालरूपिणी ॥ २६ ॥

सुवर्ण-रसना नासा चक्षुः स्पर्शवती रसा ।
गन्धप्रिया सुगन्धा च सुस्पर्शा च मनोगतिः ॥ २७ ॥

मृगनाभिर् मृगाक्षी च कर्पूरामोद-धारिणी ।
पद्मयोनिः सुकेशी च सुलिङ्गा भगरूपिणी ॥ २८ ॥

योनिमुद्रा महामुद्रा खेचरी स्वर्ग-गामिनी ।
मधुश्रीर् माधवी वल्ली मधुमत्ता मदोद्धता ॥ २९ ॥

मातङ्गी शुकहस्ता च पुष्प-बाणेक्षु-चापिनी ।
रक्ताम्बरधरा धीरा महाश्वेता वसुप्रिया ॥ ३० ॥

ॐ ह्रां ह्रीं ह्रूं ह्रः रक्ताम्बरी स्वाहा ।

शुभ्राम्बरधरा धारा रक्त-पुष्पावतंसिनी ।
सुवेणी पद्महस्ता च मुक्ताहार-विभूषणा ॥ ३१ ॥

कर्पूरामोद निःश्वासा पद्मिनी पद्ममन्दिरा ।
खड्गिनी चक्रहस्ता च भुसुण्डी परिघायुधा ॥ ३२ ॥

चापिनी पाशहस्ता च त्रिशूल-वर-धारिणी ।
सुबाणा शक्ति-हस्ता च मयूर-वरवाहना ॥ ३३ ॥

वरायुधधरा धीरा वीरपानमदोत्कटा ।
वसुधा वसुधारा च जया शाकम्भरी शिवा ॥ ३४ ॥

विजया च जयन्ती च सुस्तनी शत्रु-नाशिनी ।
अन्तर्वती देवशक्तिर् वरदा वरधारिणी ॥ ३५ ॥

शीतला च सुशीला च बालग्रह-विनाशिनी ।
कौमारी च सुपर्णा च कामाख्या काम-वन्दिता ॥ ३६ ॥

जालन्धर-धरा ऽनन्ता कामरूप-निवासिनी ।
कामबीजवती सत्या सत्य-मार्ग-परायणा ॥ ३७ ॥

स्थूल-मार्ग-स्थिता सूक्ष्मा सूक्ष्म-बुद्धिः-प्रबोधिनी ।
षट्कोणा च त्रिकोणा च त्रिनेत्रा वृषभ-ध्वजा ॥ ३८ ॥

वृषप्रिया वृषारूढा महिषासुर-घातिनी ।
शुम्भ-दर्प-हरा दृप्ता दीप्त-पावक-सन्निभा ॥ ३९ ॥

कपाल-भूषणा काली कपालवर-धारिणी ।
कपाल-कुण्डला दीर्घा शिवदूती घनस्वना ॥ ४० ॥

सिद्धिदा बुद्धिदा नित्या तत्त्व-मार्ग-प्रबोधिनी ।
कम्बुग्रीवा वसुमती छत्रच्छाया कृतालया ॥ ४१ ॥

कुण्डलिनी जगद्गर्भा भुजङ्गाकार-शायिनी ।
प्रोल्लसत् सप्तपद्मा च नाभि-नाल-मृणालिनी ॥ ४२ ॥

मूलाधारा निराकारा वह्नि-कुण्ड-कृतालया ।
वायु-कुण्ड-सुखासीना निराधारा निराश्रया ॥ ४३ ॥

श्वासोच्छ्वासगतिर् जीवा ग्राहिणी वह्नि-संश्रया ।
वल्ली-तन्तु-समुत्थाना षड्रसा स्वाद-लोलुपा ॥ ४४ ॥

तपस्विनी तपः-सिद्धा तापसी च तपः-प्रिया ।
तपोनिष्ठा तपोयुक्ता तपसः-सिद्धि-दायिनी ॥ ४५ ॥

सप्त-धातु-मयी मूर्तिः सप्त-धात्वन्तराश्रया ।
देहपुष्टिर् मनस्तुष्टिर् रत्नपुष्टिर् बलोद्धता ॥ ४६ ॥

औषधी वैद्यमाता च द्रव्य-शक्तिः प्रभाविनी ।
वैद्य-विद्या चिकित्सा च सुपथ्या रोग-नाशिनी ॥ ४७ ॥

मृगया मृगमांसादा मृगत्वङ् मृगलोचना ।
वागुरा बन्धरूपा च वधरूपा वधोद्धता ॥ ४८ ॥

वन्ध्या वन्दि-स्तुता कारा-गार-बन्ध-विमोचिनी ।
शृङ्खला कलहा विद्या दृढ-बन्ध-विमोक्षिणी ॥ ४९ ॥

अम्बिका ऽम्बालिका चाऽम्बा स्वच्छा साधुजनाऽर्चिता ।
कौलिकी कुलविद्या च सुकुला कुलपूजिता ॥ ५० ॥

कालचक्रभ्रमा भ्रान्ता विभ्रमा भ्रम-नाशिनी ।
वात्याली मेघमाला च सुवृष्टिः सस्य-वर्धिनी ॥ ५१ ॥

अकारा च इकारा च उकारौकार-रूपिणी ।
ह्रीङ्कार-बीज-रूपा च क्लीङ्काराम्बर-धारिणी ॥ ५२ ॥

सर्वाक्षरमयी शक्तिर् अक्षरार्णव-मालिनी ।
सिन्दूरारुण-वर्णा च सिन्दूर-तिलक-प्रिया ॥ ५३ ॥

वश्या च वश्य-बीजा च लोक-वश्य-विभाविनी ।
नृपवश्या नृपैः-सेव्या नृप-वश्यकरी प्रिया ॥ ५४ ॥

महिषी नृपमान्या च नृपाज्ञा नृप-नन्दिनी ।
नृप-धर्म-मयी धन्या धन-धान्य-विवर्धिनी ॥ ५५ ॥

ॐ ह्रीं श्रीं क्लीं कृत्तिका कलि-नाशिन्यै नमः स्वाहा ।

चातुर्-वर्ण-मयी मूर्तिश् चतुर्वर्णप्रपूजिता ।
सर्व-धर्म-मयी सिद्धिः चतुराश्रम-वासिनी ॥ ५६ ॥

ब्राह्मणी क्षत्रिया वैश्या शूद्रा चावरवर्णजा ।
वेद-मार्ग-रता यज्ञा वेद-विश्व-विभाविनी ॥ ५७ ॥

अस्त्र-शस्त्र-मयी विद्या वरशस्त्राऽस्त्र-धारिणी ।
सुमेधा सत्यमेधा च भद्रकाल्यपराजिता ॥ ५८ ॥

गायत्री सत्कृतिः सन्ध्या सावित्री त्रिपदाश्रया ।
त्रिसन्ध्या त्रिपदी धात्री सुपथा सामगायिनी ॥ ५९ ॥

पाञ्चाली बालिका बाला बालक्रीडा सनातनी ।
गर्भाधारा धरा शून्या गर्भाशय-निवासिनी ॥ ६० ॥

सुरारि-घातिनी कृत्या पूतना च तिलोत्तमा ।
लज्जा रसवती विद्या भवानी पाप-नाशिनी ॥ ६१ ॥

पट्टाम्बरधरा गीता सुगीतिर् गान-गोचरा ।
सप्त-स्वरमयी तन्त्री षड्ज-मध्यम-धैवता ॥ ६२ ॥

मूर्छना ग्राम-संस्थाना सुस्थाना स्थान-वासिनी ।
अट्टाट्टहासिनी प्रेता प्रेतासन-निवासिनी ॥ ६३ ॥

गीत-नृत्य-प्रिया कामा तुष्टिदा पुष्टिदा क्षमा ।
निष्ठा सत्यप्रिया प्रज्ञा लोकेशा च तिलोत्तमा ॥ ६४ ॥

सविषा ज्वालिनी ज्वाला विष-मोहार्ति-हारिणी ।
शतमारी महादेवी वैष्णवी शत-पत्रिका ॥ ६५ ॥

विषारिर् नागदमनी कुरुकुल्ला ऽमृतोद्भवा ।
भूत-भीति-हरा रक्षा भूतावेश-विनाशिनी ॥ ६६ ॥

रक्षोघ्नी राक्षसी रात्रिर् दीर्घनिद्रा दिवागतिः ।
चन्द्रिका चन्द्रकान्तिश् च सूर्यकान्तिर् निशाचरी ॥ ६७ ॥

डाकिनी शाकिनी शिक्षा हाकिनी चक्रवाकिनी ।
शीता शीतप्रिया स्वाङ्गा सकला वनदेवता ॥ ६८ ॥

गुरुरूपधरा गुर्वी मृत्युमारी विशारदा ।
महामारी विनिद्रा च तन्द्रा मृत्यु-विनाशिनी ॥ ६९ ॥

चन्द्र-मण्डल-सङ्काशा चन्द्र-मण्डल-वर्तिनी ।
अणिमादि-गुणोपेता सुस्पृहा काम-रूपिणी ॥ ७० ॥

अष्ट-सिद्धि-प्रदा प्रौढा दुष्ट-दानव-घातिनी ।
अनादिनिधना पुष्टिस्ः चतुर्बाहुश् चतुर्मुखी ॥ ७१ ॥

चतुराब्धिशया शान्ता चतुर्वर्ग-फलप्रदा ।

काश-पुष्प-प्रतीकाशा शरत्-कमल-लोचना ॥ ७२ ॥

सोम-सूर्याग्नि-नयना ब्रह्म-विष्णु-शिवार्चिता ।
कल्याणी कमला कन्या शुभा मङ्गल-चण्डिका ॥ ७३ ॥

भूता भव्या भविष्या च शैलजा शैलवासिनी ।
वाम-मार्ग-रता वामा शिव-वामाङ्ग-वासिनी ॥ ७४ ॥

वामाचार-रता तुष्टिर् लोपामुद्रा प्रबोधिनी ।
भूतात्मा परमात्मा च भूत-भाव-विभाविनी ॥ ७५ ॥

मङ्गला च सुशीला च परमार्थ-प्रबोधिका ।
दक्षिणा दक्षिणामूर्तिः सुदक्षा च हरिप्रिया ॥ ७६ ॥

योगिनी योगनिद्रा च योगाङ्ग-ध्यान-शालिनी ।
योगपट्टधरा युक्ता मुक्तानां-परमा-गतिः ॥ ७७ ॥

नारसिंही सुजन्मा च त्रिवर्ग-फल-दायिनी ।
धर्मदा धनदा चैव कामदा मोक्षदा द्युतिः ॥ ७८ ॥

साक्षिणी क्षणदा ऽऽकाङ्क्षा दक्षजा कोटि-रूपिणी ।
क्रतुः कात्यायनी स्वच्छा स्वच्छन्दा च कविप्रिया ॥ ७९ ॥

ॐ ह्रीं श्रीं कर्णिका काल-नाशिनी नमः स्वाहा ।
सत्यागमा बहिःस्था च काव्यशक्तिः कवित्वदा ।
मेनापुत्री सती साध्वी मैनाक-भगिनी तडित् ॥ ८० ॥

सौदामिनी सुधामा च सुधाम्नी धाम-शालिनी ।
सौभाग्य-दायिनी देवी सुभगा द्युति-वर्द्धिनी ॥ ८१ ॥

ह्रीः श्रीश् च कृत्तिवसना कृत्तिका काल-नाशिनी ।
रक्तबीज-वधोद्युक्ता सुतन्तुर् बीजसन्ततिः ॥ ८२ ॥

ॐ श्रीं ह्रीं कृत्तिका कलि-नाशिन्यै नमः स्वाहा ।

जगज्जीवा जगद्बीजा जगत्रय-हितैषिणी ।
चामीकरा च चन्द्रा च साक्षात् षोडशिका कला ॥ ८३ ॥

यत्तत्पदानुबन्धा च यक्षिणी धनदाऽर्चिता ।
चित्रिणी चित्रमाया च विचित्रा भुवनेश्वरी ॥ ८४ ॥

चामुण्डा मुण्डहस्ता च चण्ड-मुण्ड-वधोद्यता ।
अष्टम्येकादशी पूर्णा नवमी च चतुर्दशी ॥ ८५ ॥

उमा कलशहस्ता च पूर्ण-कुम्भ-पयोधरा ।
अभीरूर्भैरवी भीरूर् भीमा त्रिपुरभैरवी ॥ ८६ ॥

महाचण्डा च रौद्री च महाभैरव-पूजिता ।
निर्मुण्डा हस्तिनी चण्डा विकराला दशनानना ॥ ८७ ॥

कराला विकराला च घोर-घुर्घुर-नादिनी ।
रक्त-दन्तोर्ध्वकेशी च बन्धूक-कुसुमारुणा ॥ ८८ ॥

कादम्बरी विपाशा च काश्मीर-कुङ्कुमप्रिया ।

क्षितिर् बहुसुवर्णा च रतिर् बहुसुवर्णदा ॥ ८९ ॥

मातङ्गिनी वरारोहा मत्त-मातङ्ग-गामिनी ।
हंसा हंसगतिर् हंसी हंसोज्वल शिरोरुहा ॥ ९० ॥

पूर्‍ण-चन्द्र-मुखी श्यामा स्मिताशा च सुकुण्डला ।
मषी च लेखनी लेखा सुलेखा लेखक-प्रिया ॥ ९१ ॥

शङ्खिनी शङ्ख-हस्ता च जलस्था जलदेवता ।
कुरुक्षेत्रावनी काशी मथुरा काञ्च्यवन्तिका ॥ ९२ ॥

अयोध्या द्वारिका माया तीर्था तीर्थकरी प्रिया ।
त्रिपुष्करा ऽप्रमेया च कोशस्था कोश-वासिनी ॥ ९३ ॥

कौशिकी च कुशावर्ता कौशाम्बा कोश-वर्धिनी ।
कोशदा पद्मकोशाक्षी कौसुम्भ कुसुम-प्रिया ॥ ९४ ॥

तोतुला च तुलाकोटिः कोटस्था कोटराश्रया ।
स्वयम्भूश्च सुरूपा च स्वरूपा रूप-वर्धिनी ॥ ९५ ॥

तेजस्विनी सुदीक्षा च बलदा बलदायिनी ।
महाकोशा महागर्ता बुद्धिः सदसदात्मिका ॥ ९६ ॥

महाग्रह-हरा सौम्या विशोका शोक-नाशिनी ।
सात्विका सत्व-संस्था च राजसी च रजोवृता ॥ ९७ ॥

तामसी च तमोयुक्ता गुणत्रय-विभाविनी ।
अव्यक्ता व्यक्तरूपा च वेदविद्या च शाम्भवी ॥ ९८ ॥

शङ्करा कलिनी कल्पा मनः-सङ्कल्प-सन्ततिः ।
सर्वलोकमयी शक्तिः सर्व-श्रवण-गोचरा ॥ ९९ ॥

सर्वज्ञानवती वाञ्छा सर्व-तत्त्वावबोधिका ।
जाग्रती च सुषुप्तिश् च स्वप्नाऽवस्था तुरीयका ॥ १०० ॥

त्वरा मन्द-गतिर् मन्दा मदिरा मोद-दायिनी ।
पानभूमिः पानपात्रा पान-दान-करोद्यता ॥ १०१ ॥

आघूर्णारुण-नेत्रा च किञ्चिदव्यक्त-भाषिणी ।
आशापूरा च दीक्षा च दक्षा दीक्षित-पूजिता ॥ १०२ ॥

नागवल्ली नागकन्या भोगिनी भोगवल्लभा ।
सर्व-शास्त्रमयी विद्या सुस्मृतिर् धर्मवादिनी ॥ १०३ ॥

श्रुति-स्मृति-धरा ज्येष्ठा श्रेष्ठा पाताल-वासिनी ।
मीमांसा तर्कविद्या च सुभक्तिर् भक्तवत्सला ॥ १०४ ॥

सुनाभिर् यातना याती गम्भीरा ऽभाव-वर्जिता ।
नागपाशधरा मूर्तिर् अगाधा नागकुण्डला ॥ १०५ ॥

सुचक्रा चक्र-मध्यस्था चक्रकोण-निवासिनी ।
सर्व-तन्त्र-मयी विद्या सर्व-मन्त्राक्षरा तथा ॥ १०६ ॥

मधुस्रवा स्रवन्ती च भ्रामरी भ्रमरालया ।
ॐ ह्रां ह्रीं ह्रूं ह्रः रक्तेश्वर्यै नमः स्वाहा ।
मातृ-मण्डल-मध्यस्था मातृ-मण्डल-वासिनी ॥ १०७ ॥

कुमार-जननी क्रूरा सुमुखी ज्वर-नाशिनी ।
निधाना-पञ्च-भूतानां भव-सागर-तारिणी ॥ १०८ ॥

अक्रूरा च ग्रहवती विग्रहा ग्रह-वर्जिता ।
रोहिणी भूमि-गर्भा च कालभूः कालवर्तिनी ॥ १०९ ॥

कलङ्क-रहिता नारी चतुः-षष्ट्यभिधायिनी ।
अतीव-विद्यमाना च भाविनी प्रीतिमञ्जरी ॥ ११० ॥

सर्वसौख्यवती भुक्तिर् आहार-परिणामिनी ।
जीर्णा च जीर्ण-वस्त्रा च नूतना नववल्लभा ॥ १११ ॥

अजरा च रजः-प्रीता रतिराग-विवर्धिनी ।
पञ्च-वातगतिर् भिन्ना पञ्च-श्लेष्माशयाधरा ॥ ११२ ॥

पञ्च-पित्तवती शक्तिः पञ्च-स्थान-विभाविनी ।
उदक्या च वृषस्यन्ती वृष-प्रस्रविणीहया ॥ ११३ ॥

रजः शुक्रधरा शक्तिर् जरायुर् गर्भ-धारिणी ।
त्रिकालज्ञा त्रिलिङ्गा च त्रिमूर्तिस् त्रिपुरसुन्दरी ॥ ११६ ॥

अरागा शिवतत्त्वा च काम-तत्त्वा च रागिणी ।
प्राच्यवाची प्रतीची च दिगुदीची विदिग्दिशा ॥ ११७ ॥

अहङ्कृतिर् अहङ्कारा बलिमाया बलिप्रिया ।
स्रुक्स्रुवा सामिधेनी च सुश्रद्धा श्राद्ध-देवता ॥ ११८ ॥

माता मातामही तृप्तिः पितुर्माता पितामही ।
स्नुषा दौहित्रिणी पुत्री पौत्री नप्त्री स्वसा प्रिया ॥ ११९ ॥

स्तनदा स्तनधारा च विश्वयोनिः स्तनन्धया ।
शिशूत्सङ्गधरा डोला डोलाक्रीडाभिनन्दिनी ॥ १२० ॥

उर्वशी कदली केका विशिखा शिखिवर्तिनी ।
खट्वाङ्गधारिणी खड्ग बाण-पुङ्खानुवर्तिनी ॥ १२१ ॥

लक्ष्य-प्राप्तिकरा लक्ष्या सुलक्षा शुभलक्षणा ।
वर्तिनी सुपथाचारा परिखा च खनिर्वृतिः ॥ १२२ ॥

प्राकार-वलया वेला मर्यादा च महोदधिः ।
पोषिणी शोषिणी शक्तिर् दीर्घकेशी सुलोमशा ॥ १२३ ॥

ललिता मांसला तन्वी वेद-वेदाङ्ग-धारिणी ।
नरासृक्पानमत्ता च नर-मुण्ड-विभूषणा ॥ १२४ ॥

अक्षक्रीडारतिः सारी शारिका शुक-भाषिणी ।
शाम्भवी गारुडी विद्या वारुणी वरुणार्चिता ॥ १२५ ॥

ॐ व्रां व्रीं व्रूं व्रः वाराह्यै नमः स्वाहा ।
वाराही तुण्ड-हस्ता च दंष्ट्रोद्धृत-वसुन्धरा ।
मीनमूर्तिर् धरामूर्तिः वदान्या प्रतिमाश्रया ॥ १२६ ॥

अमूर्ता निधिमूर्ता च शालिग्राम-शिला शुचिः ।
स्मृतिः संस्कार-रूपा च सुसंस्कारा च संस्कृतिः ॥ १२७ ॥

प्राकृता देशभाषा च गाथा गीतिः प्रहेलिका ।
इडा च पिङ्गला पिङ्गा सुषुम्ना सूर्यवाहिनी ॥ १२८ ॥

शुचिस्रवा च तालुस्था काकिनी मृतजीविनी ।
अणुरूपा बृहद्रूपा लघुरूपा गुरुस्थिरा ॥ १२९ ॥

स्थावरी जङ्गमा देवी कृत-कर्म-फल-प्रदा ।
विषयाक्रान्त-देहा च निर्विषा च जितेन्द्रिया ॥ १३० ॥

चित्स्वरूपा चिदानन्दा परब्रह्मावबोधिनी ।
निर्विकारा च निर्वैरा रतिः सत्याऽधिवर्तिनी ॥ १३१ ॥

पुरुषा ऽज्ञान-भिन्ना च क्षान्तिः कैवल्य-दायिनी ।
विविक्त-सेविनी प्राज्ञा ज्वलना च बहुश्रुता ॥ १३२ ॥

निरीहा च समस्तैका सर्व-लोकैक-सेविता ।
सेवा सेवाप्रिया सेव्या सेवा-फल-विवर्द्धिनी ॥ १३३ ॥

कलिः कल्किप्रिया शीला दुष्ट-म्लेच्छ-विनाशिनी ।
प्रत्यक्षा च धुनर् यष्टिः खड्गधारा धरारथा ॥ १३४ ॥

अश्वप्लुता च वल्गा च सृणिर्मत्ता च वारुणी ।
वीरसूर् वीरमाता च वीरश्रीर् वीरनन्दिनी ॥ १३५ ॥

जयश्रीर् जयदीक्षा च जयदा जयवर्द्धिनी ।
सौभाग्या च शुभाकारा सर्व-सौभाग्य-दायिनी ॥ १३६ ॥

क्षेमङ्करी क्षेमरूपा सत्कीर्त्तिः पथिदेवता ।
सर्व-तीर्थ-मयी मूर्तिः सर्व-देव-मयी प्रभा ॥ १३७ ॥

सर्व-सिद्धि-प्रदा शक्तिः सर्व-मङ्गल-संज्ञिता ।
ॐ ऐं ह्रीं श्रीं क्लीं सर्व-सिद्धि-प्रदायिनी स्वाहा ।

## ॥ फलश्रुतिः ॥

पुण्यं सहस्रनामेदं शिवायाः शिव-भाषितम् ॥ १३८ ॥

यः पठेत् प्रातरुत्थाय शुचिर् भूत्वा समाहितः ।
यश्चापि शृणुयान् नित्यं नरो निश्चल-मानसः ॥ १३९ ॥

एककालं द्विकालं वा त्रिकालं श्रद्धयान्वितः ।
सर्व-दुःख-विनिर्मुक्तो धन-धान्य-समन्वितः ॥ १४० ॥

तेजस्वी बलवाञ् छूरः शोक-रोग-विवर्जितः ।
यशस्वी कीर्तिमान् धन्यः सुभगो लोक-पूजितः ॥ १४१ ॥

रूपवान् गुण-सम्पन्नः प्रभा-वीर्य-समन्वितः ।
श्रेयांसि लभते नित्यं निश्चलां च शुभां श्रियम् ॥ १४२ ॥

सर्व-पाप-विनिर्मुक्तो लोभ-क्रोध-विवर्जितः ।
नित्यं बन्धु सुतैर् दारैः पुत्र पौत्रैर् महोत्सवैः ॥ १४३ ॥

नन्दितः सेवितो भृत्यैर् बहुभिः शुद्ध-मानसैः ।
विद्यानां-पारगो-विप्रः क्षत्रियो-विजयी-रणे । ॥ १४४ ॥

वैश्यस्तु-धन-लाभाढ्यः शूद्रश्च-सुखमेधते ।
पुत्रार्थी-लभते-पुत्रं धनार्थी-लभते-धनम् ॥ १४५ ॥

इच्छा-कामं-तु-कामार्थी धर्मार्थी-धर्ममक्षयम् ।
कन्यार्थी-लभते-कन्यां रूप-शील-गुणन्विताम् ॥ १४६ ॥

क्षेत्रं-च-बहु-शस्यं-स्याद् गावश्च-बहु-दुग्धदाः ।
नाऽशुभं नाऽपदस् तस्य न भयं नृप-शत्रुभिः ॥ १४७ ॥

जायते-नाऽशुभा-बुद्धिर् लभते-कुल-धुर्यताम् ।
न-बाधन्ते-ग्रहास्-तस्य न-रक्षांसि-न-पन्नगाः ॥ १४८ ॥

न पिशाचा न डाकिन्यो भूतव्यन्तर-जृम्भिकाः ।
बालग्रहाभिभूतानां बालानां शान्ति-कारकम् ॥ १४९ ॥

द्वन्द्वानां प्रीतिभेदे च मैत्री-करणमुत्तमम् ।
लोहपाशैर् दृढैर् बद्धो बन्धी वेश्मनि दुर्गमे ॥ १५० ॥

तिष्ठन् शृण्वन् पठेन् मर्त्यो मुच्यते नात्र संशयः ।
न दाराणां न पुत्राणां न बन्धूनां न मित्रजम् ॥ १५१ ॥

पश्यन्ति नहि ते शोकं वियोगं चिरजीविनः ।
अन्धस्तु लभते दृष्टिं चक्षु-रोगैर् न बाध्यते ॥ १५२ ॥

वधिरः श्रुतिमाप्नोति मूको वाचं शुभां नरः ।
एतद् गर्भा च या नारी स्थिर-गर्भा प्रजायते ॥ १५३ ॥

स्रावणी बद्ध-गर्भा च सुखमेव प्रसूयते ।
कुष्ठिनः शीर्ण-देहा ये गतकेश नखत्वचः ॥ १५४ ॥

पठनाच् छ्रवणाच् चापि दिव्यकाया भवन्ति ते ।

ये पठन्ति शतावर्तं शुचिष्मन्तो जितेन्द्रियाः ॥ १५५ ॥

अपुत्राः प्राप्नुयुः पुत्रान् श्रृण्वन्तोऽपि न संशयः ।
महाव्याधि परिग्रस्ता ग्रस्ता ये विविधैर्-ज्वरैः ॥ १५६ ॥

भूताभिषङ्ग सञ्जातैश् चार्तुथिक तृतीयकैः ।
अन्यैश्च दारुणैर् रोगैः पीड्यमानाश् च मानवाः ॥ १५७ ॥

गतबाधाश्च जायन्ते मुक्तास्तेतैर् न संशयः ।
श्रुति ग्रन्थधरो बालो दिव्यवादी कवीश्वरः ॥ १५८ ॥

पठनाच् छ्रवणाच् चापि भविष्यति न संशयः ।
अष्टम्यां वा चतुर्दश्यां नवम्यां चैकचेतसः ॥ १५९ ॥

ये पठन्ति नरा भक्त्या न ते वै दुःख-भागिनः ।
नवरात्रं जिताहारो दृढ-भुद्धिर्-जिन्तेन्द्रियः ॥ १६० ॥

चण्डिकायतने विद्वाञ् छुचिष्मान् मूर्ति-सन्निधौ ।
एकाकी च शतावर्तं पठन् धीरश् च निर्भयः ॥ १६१ ॥

साक्षाद् भगवती तस्मै प्रयच्छेद् ईप्सितं फलम् ।
सिद्धिपीठे गिरौ रम्ये सिद्धक्षेत्रे सुरालये ॥ १६२ ॥

पठनात् साधकस्याशु सिद्धिर् भवति वाञ्छिता ।
दशावर्तं पठेन् नित्यं भूमिशायी नरः शुचिः ॥ १६३ ॥

स्वप्ने मूर्तिमयीं देवीं वरदां सोऽपि पश्यति ।
आवर्तन सहस्रैर् ये पठन्ति पुरुषोत्तमाः ॥ १६२ ॥

ते सिद्धाः सिद्धिदा लोके शापाऽनुग्रह-कारकाः ।
कवित्वे संस्कृते तेषां शास्त्राणां व्याकृतौ स्वतः ॥ १६३ ॥

शक्तिः प्रोन्मीलिते तेषां अनधीतेपि भारती ।
नखराग शिरो-रत्न द्विगुणीकृत-रोचिषः ॥ १६४ ॥

प्रयच्छन्तश् च सर्वस्वं सेवन्ते तान् महीश्वराः ।
रोचना लिखितं भूर्जे कुङ्कुमेन शुभे दिने ॥ १६५ ॥

धारयेद् यन्त्रितं देहे पूजयित्वा कुमारिकाम् ।
विप्राश्च वरनारीश्च धूपैः कुसुम-चन्दनैः ॥ १६६ ॥

क्षीर-खण्डा ऽज्यभोज्यैश् च पूजयित्वा सुभूषिता ।
विधाय मातृका न्यासं अङ्गन्यास पुरस्सरम् ॥ १६७ ॥

भूत-शुद्धि समोपैतं शृङ्खला न्यासमाचरेत् ।
यथा वदाशासंवद्धः साधकः प्रीति संयुतः ॥ १६८ ॥

मूलमन्त्रं जपेद् धीमान् परया संयुतोधिया ।
प्रणवं पूर्वमुद्धृत्य रमाबीजं अनुस्मरन् ॥ १६९ ॥

माया कामौ समुच्चार्य पुनर्जायां विभावसोः ।

ॐ श्रीं ह्रीं क्लीं स्वाहा ।

बध्नन्ति ये महारक्षां बालानां च विशेषतः ॥ १७० ॥

भवन्ति नृप पूज्यास्ते कीर्तिभाजो यशस्विनः ।
शत्रुतो न भयं तेषां दुर्जनेभ्यो न राजतः ॥ १७१ ॥

न च रोगो न वै दुःख न दारिद्र्यं न दुर्गतिः ।
महार्णवे महानद्यां पोतस्थेषु न भीः क्वचित् ॥ १७२ ॥

रणेद्यते विवादे च विजयं प्राप्नुवन्ति ते ।
नृपाश्च वश्यतां यान्ति नृप-मान्याश्च ते नराः ॥ १७३ ॥

सर्वत्र पूजिता लोके बहुमान पुरस्सराः ।
रति-रागविवृद्धाश् च विह्वलाः काम-पीडिताः ॥ १७४ ॥

यौवनाक्रान्त देहास्ताः श्रयन्ते वामलोचनाः ।
लिखितं मूर्ध्नि कण्ठे वा धारयेद् यो रणे शुचिः ॥ १७५ ॥

शतधा युध्यमानं तु प्रतियोद्धा न पश्यति ।
केतौ वा दुन्दुभौ येषां निबद्धं लिखितं रणे ॥ १७६ ॥

महासैन्ये परिग्रस्तान् कान्तिशीकान् हतौजसः ।
विचेतनान् विमूढांश् च शत्रु-कृत्य-विवर्जितान् ॥ १७७ ॥

निर्जित्य शत्रु-सङ्घास्ते लभन्ते विजयं ध्रुवम् ।
नाऽभिचारो ने शापश्च बाण-वीरादि-कीलनम् ॥ १७८ ॥

डाकिनी पूतना कृत्या महामारी च शाकिनी ।
भूत-प्रेत-पिशाचाश्च रक्षांसि व्यन्तरादयः ॥ १७९ ॥

न विशन्ति गृहे देहे लिखितं यत्र तिष्ठति ।
न शस्त्राऽनल तोयौघाद् भयं क्वापि न जायते ॥ १८० ॥

दुर्वृत्तानां च पापानां बलहानिकरं परम् ।
मन्दुरा करिशालासु गवां गोष्ठे समाहितः ॥ १८१ ॥

पठेत् तद्दोष-शान्त्यर्थं कूट कापट्य-नाशनम् ।
यम-दूतान् न पश्यन्ति न ते निरययातनाम् ॥ १८२ ॥

प्राप्नुवन्त्यक्षयं शान्तं शिवलोकं सनातनम् ।
सर्वबाधा-सुघोरासु सर्व-दुःख-निवारणम् ॥ १८३ ॥

सर्व-मङ्गल-करं स्वर्ग्यं पठितव्यं समाबुधैः ।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ॥ १८४ ॥

पुण्यं सहस्रनामेदं अम्बाया रुद्र-भाषितम् ।
चतुर्वर्ग-प्रदं सत्यं नन्दिकेन प्रकाशितम् ॥ १८५ ॥

नातः परतरो मन्त्रो नातः परतरः स्तवः ।
नातः परतरा विद्या तीर्थं नातः परात्पराः ॥ १८६ ॥

ते धन्याः कृत-पुण्यास्ते त एव भुवि पूजिताः ।
एकभावं सदा नित्यं येऽर्चयन्ति महेश्वरीम् ॥ १८७ ॥

देवतानां देवता या ब्रह्माद्यैर् या च पूजिता ।
भूयात् सा वरदा लोके साधूनां विश्वमङ्गला ॥ १८८ ॥

एतामेव पुराराद्यां विद्यां त्रिपुरभैरवीम् ।
त्रैलोक्य-मोहिनी-रूपां अकार्षीद् भगवान् हरिः ॥ १८९ ॥

---

**॥ इति श्रीरुद्रयामले तन्त्रे नन्दिकेश्वर संवादे**
**महाप्रभावी भवानी नामसहस्र स्तोत्रं सम्पूर्णम् ॥**